# Sri Rama Navavarana Stotram

# શ્રીરામનવાવરણસ્તોત્રમ્

## Document Information

Text title : Rama Navavarana Stotram

File name : rAmanavAvaraNastotram.itx

Category : raama, puShpAshrIvatsan

Location : doc_raama

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Translated by : Pushpa Srivatsan

Latest update : October 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 15, 2021

*sanskritdocuments.org*

# શ્રીરામનવાવરણસ્તોત્રમ્

ૐ

શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ નામમન્ત્રાય વિદ્મહે । ભવતારાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ।

અથ શ્રીરામનવાવરણસ્તોત્રમ્ ।

ધ્યાનમ્ -
રામો બ્રહ્મસ્વયંજાતો ભાવનાવો ભવાપહઃ ।
નામતારકસત્સારો રામો રક્ષતુ માં સદા ॥

શ્રીરામઃ સત્યવાક્સત્યઃ શ્રીત્યાગરાજસન્નુતઃ ।
શ્રીદદાશરથીપુણ્યઃ શ્રીસીતાવરનાથસઃ ॥ ૧॥

શ્રીરામં નાદસાન્નિધ્યં નાદોપાસનસુપ્રિયમ્ ।
રાગસઙ્ગીતલોલં કં નાદાત્મકં પ્રણૌમ્યહમ્ ॥ ૨॥

રામેણ સ્થાપિતો ધર્મો રામેણ સ્ફુરિતઃ સ્તવઃ ।
રામેણ રક્ષિતં સર્વં રામેણ નન્દિતા નુતિઃ ॥ ૩॥

રામાય પૂજનં સ્તોત્રં રામાય નાદપૂજનમ્ ।
રામાય સુસ્વરાગીતં શ્રીરામાય નમો નમઃ ॥ ૪॥

રામાત્સંજાયતે સર્વં રામાત્સુસ્વરસમ્ભવઃ ।
રામાલ્લભતે સુજ્ઞાનં રામાદ્ભવતિ સુસ્વરઃ ॥ ૫॥ (૧)

રામસ્ય પૂજનં શ્રેષ્ઠં રામસ્ય કીર્તનં વરમ્ ।
રામસ્ય નામ સત્પુણ્યં રામસ્ય કરુણા સ્થિરા ॥ ૬॥

રામે સઁલ્લીયતે સર્વં રામે લીનઃ સુમાનસઃ ।

રામે ભક્તિઃ સુરક્ષા ચ રામે ભક્તિઃ સુમોક્ષદા ॥ ૭॥

રામ ત્વમસિ મજ્જીવો રામાહં શરણાગતા ।
રામ ક્ષમસ્વ મચ્છિન્દ્રં રામપ્રભો પ્રસીદ મે ॥ ૮॥

રામઃ સીતાપતિર્વિષ્ણૂ રામં કીર્તય સર્વદા ।
રામેણ બોધિતા ગીતા રામાય શુભમઙ્ગલમ્ ॥ ૯॥

રામાત્પ્રણવનાદોત્થં રામસ્ય સુસ્વરં શુભમ્ ।
રામે ભક્તિસ્તુતિઃ પૂર્ણા રામ ત્વય્યર્પિતા સ્તુતિઃ ॥ ૧૦॥

કામક્રોધમદાજ્ઞાનલોભમાત્સર્યમોહહા ।
તમોઽહંકારસમ્પાટો નવાવરણપારકઃ ॥ ૧૧॥

નવાવરણસુસ્તોત્રં શ્રીરામસુકૃપોદ્ભવમ્ ।
ગુરુસ્વામિકૃપાપૂર્ણં શિષ્યાપુષ્પાભિવન્દનમ્ ॥ ૧૨॥

મઙ્ગલં રામભદ્રાય સીતાવરાય મઙ્ગલમ્ ।
મઙ્ગલં ત્યાગરાજાય રામભક્તાય મઙ્ગલમ્ ॥ ૧૩॥

ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાસુગીતકમ્ ।
ગુરુપ્રેરણસઙ્ગીતં રામસ્તોત્રં સુમઙ્ગલમ્ ॥ ૧૪॥

ૐ
શ્રીસીતારામપરબ્રહ્મણે નમો નમઃ ।
શુભમસ્તુ

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિશિષ્યયા પુષ્પયા
સુભક્ત્યા ગુર્વનુગ્રહેણ કૃતં શ્રીરામનવાવરણસ્તોત્રં
શ્રીરામભક્તગુરુસ્વામિસન્નિધૌ સમર્પિતમ્ ।
ૐ

(1) Footnote, verse 5
First line સુસ્વર - Susvara vidyA i.e Sangita;
Second line: સુસ્વરઃ - sweet voice

Composed and translated by Pushpa Srivatsan (Copyright)
Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Sri Rama Navavarana Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 15, 2021

Please send corrections to *sanskrit@cheerful.com*